# Shankara Stotram

# શઙ્કરસ્તોત્રમ્ ૫

## Document Information

Text title : Shankara Stotram

File name : shankarastotram5.itx

Category : shiva, moropanta, stotra

Location : doc_shiva

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 23, 2023

*sanskritdocuments.org*

# શઙ્કરસ્તોત્રમ્ ૫

(સ્વાગતાવૃત્તં)
પર્વરાત્રિરમણામૃતભાસાં(૧) સર્વગર્વહર ! । નિર્મલકાન્તે !
પર્વતેશ્વરસુતાધવ! શમ્ભો! શર્વ! મામવ નતં જનમાર્તમ્ ॥ ૧॥

પઙ્કરાશિમપિ પાવનકીર્તે! । રઙ્કરાજમવ માં કરુણાબ્ધે!
(૨)શઙ્કરાઽનતમલં તવ કર્તું કં કરાબ્જમનઘં ન સદીડ્યમ્ ॥ ૨॥

પાદપા(૩) દિવિષદાં ન યથા તે પાદપાંસુરખિલેશ સુખાસ્યૈ ।
સાદરા તવ મતિર્ભજદિષ્ટે(૪) યાઽદરાદવતિ સંશ્રિતવર્ગમ્ ॥ ૩॥

(૫)સ્વર્ગવાસ્યરિશિતક્ષયકર્માનર્ગલપ્રથિતનિસ્તુલશક્તે! ।
ભર્ગ! તેઽદ્ય ભજતોઽપિ ન (૬)ષણ્ણાં વર્ગ એષ નિહતો દ્વિષતાં મે ॥ ૪॥

નેદમન્નવસનાદપિ કાલાત્તે દરવ્યસનમીશ! । લભન્તે ।
વેદગીતગુણ! તે શિવ ! દૃષ્ટા યે દયામૃતરસાર્દ્રદૃશાત્ર ॥ ૫॥

વ્યાલદષ્ટમિવ ભેકશિશું માં કાલદષ્ટમવ દીનમનાથં ।
ભાલલોચન! મહેશ્વર ! શમ્ભો! બાલશીતકરશેખર! શર્વ ! ॥ ૬॥

સન્તુ કલ્પશતસઞ્ચિતનાનામન્તુકોટય(૭) ઉમેશ! । તથાપિ ।
જન્તુભિસ્તુ શરણીકરણીયસ્ત્વં (૮)તુષારરુગિવાખિલમ્રૈઃ ॥ ૭॥

કામકોપમુખશત્રુભિરુગ્રૈરામયૈરતિતરાકુલચતાઃ ।
હા મહેશ! કિમહં વદ કુર્યાં નામ તેઽપ્યલમયં ન ગૃહીતુમ્ ॥ ૮॥

દેવ! । યા(૯) મુદિહ સા ખલુ તોયાદેવ યાદસિ મહત્યપિ વાલ્પે ।
સેવયા તવ સુખં જગતિ ત્વામેવ યામિ શરણં શ્રુતકીર્તિઃ ॥ ૯॥

ઇન્દુચૂડ! । ગૃણતાં તવ કીર્તિં બિન્દુતાં ભજતિ સંસૃતિસિન્ધુઃ ।
વિદુના(૧૦) તદિહ સૈવ નિષેવ્યા કિં (૧૧)દુરીશ્વરગુણૈર્વત ગીતૈઃ ? ॥ ૧૦॥

દાસવત્સલ! । ભજન્તિ સુરાસ્ત્વાં વાસવપ્રભૃતયઃ પ્રભુમાદ્યં ।

હા સહાસ! પદમેવ ન નમ્રો વ્યાસવત્કવિરપિ સ્વગુરું યઃ ॥ ૧૧॥

કાપિ નાકજનમઙ્ગલમૂર્તિર્યા પિનાકસમલઙ્કૃતપાણિઃ ।
પાપિના કરુણયા દ્રુતચિત્તાપ્યાદૃતા બત મયા ન હૃદિસ્થા ॥ ૧૨॥

મૂલમુગ્રવિપદા સ્મરમક્ષ્ણા તૂલમગ્નિરિવ યોઽદહદીશઃ ।
કૂલમસ્ય મહતો ભવસિન્ધોઃ શૂલપાણિરભયાય મમાસ્તુ ॥ ૧૩॥

(૧૨) સાહિમુગ્રમપટં(૧૩) જટિલં ત્વાં સા હિમાદ્રિતનયેશ! । યથાસૌ ।
ભો! જડસ્ય મમ ધીસ્તવ પાદામ્ભોજમુત્કહૃદયાભ્યુપયાતા(૧૪) ॥ ૧૪॥

અસ્તુ નામ તવ સમ્પદભાવો વસ્તુના(૧૫) મમ મુદીશ્વર! । યેન ।
તત્ત્વયાસ્તિ વિધૃતં ખલુ કણ્ઠે તત્ત્વમાદ્યમુરુ મઙ્ગલમેકમ્ ॥ ૧૫॥

અદ્ય હન્ત કૃપણઃ કિમુ કુર્યાં યદ્યહં તવ દૃશા નહિ દૃષ્ટઃ ।
ચિત્રમેતદયિ! પઙ્કજબન્ધુ મિત્રમેવ ભવતો બહુ મન્યે ॥ ૧૬॥

યોગિર્ભિર્ન શિવ! । કેવલમુગ્રૈર્ભોગિભિઃ શ્રિતપદોઽપ્યસિ શમ્ભો !
ત્વાં તતોઽસ્મ્યુપગતઃ શરણં તત્સ્વાન્તતોષદ યશોર્ણવ! પાહિ ॥ ૧૭॥

(ઔપચ્છન્દસિકં વૃત્તં)
કિમનઙ્ગપિશાચયુક્સદાહં ન મનો ભૂતભયઙ્કરં શ્મશાનં ।
ભવતા ભવતાપભાગશુદ્ધં(૧૬) મમ વાસાય હરોરરીકૃતં તે ॥ ૧૮॥

(શિખરિણીવૃતં)
નતોઽહં તે હન્તેશ્વર ! ચરણયોર્ભૂરિદયયો-
રતઃ શમ્ભો! શં ભો! વિતર હર! મહ્યં ત્વમતુલં ।
કૃતં (૧૭)નાગો નાગોત્તમવલયકૈર્ન ભ્રમવશઃ
ક્ષમા કાર્યા; (૧૮)કાર્યાધવ! તવ કથા ન ક્ષમિનુતા? ॥ ૧૯॥

(પૃથ્વીવૃત્તં)
અનાહૃતમુમેશ! તે (૧૯)શ્રુતિશતસ્તવૈકાસ્પદં
(૨૦) પદં તદિતરદ્ગુરુ સ્વહિતમિત્યરં સેવિતમ્ ।
જનેન બત યેન તત્સપદિ તસ્ય કાલાકુલં
કિમુગ્રવિપદા ભવેન્ન જનકં પદં કમ્પદમ્ ॥ ૨૦॥

(૨૧)પુનાતિ ન ભવાન્પ્રભો! કમિહ કીર્તિતઃ કીર્તિતઃ
દદાતિ ન ફલં મુદામતિશયાચિતં યાચિતમ્ ।
કિમાસ્ત ઉત નાન્તિકેઽપ્યહહ મેઽનયા મેનયા

તયૈવ કુધિયા વિભો! ત્વમપમાનિતોઽસિ ધ્રુવમ્ ॥ ૨૧॥

પ્રસાદમુપવર્ણિતં શિવ ! તવોપમન્યાવહં
શ◌ૃણોમ્યસકૃદાદરાત્કવિભિરુત્તમૈરુત્તમમ્ ।
ભવન્તમપિ ભૂતપં સદયમાશુતોષં ભવં
પ્રભું ત્રિજગતાં ગુરું શરણમાગતસ્ત્વામતઃ ॥ ૨૨॥

(દ્રુતવિલમ્બિતવૃત્તં)
ભવ! । ન તેઽવનતે કઠિનં મનઃ સુરગુરોરગુરોરિવ ભોગિનિ ।
(૨૨)કુરુ ચિરં રુચિરં શિરસીશ ! મે સ્વપદમાપદમાશુ યદુદ્ધરેત્ ॥ ૨૩॥

(હરિણીવૃત્તં)
વરદ! કરદઃ સંસૃત્યબ્ધૌ ત્વમેવ નિમજ્જતા
સદસિ યદસિ ખ્યાતઃ સત્યં સતામિતિ સર્વથા ।
ભવતિ ભવતિગ્માંશૌ સત્યાઃ(૨૩) કથં ન તમઃક્ષતિઃ
સદયપદ ! યદ્યુક્તં તદ્ભોઃ ! કુરુષ્વ । નમોઽસ્તુ તે ॥ ૨૪॥

(પુષ્પિતાગ્રાવૃત્તં)
સ્મરહર! । કરુણાઘન ! ત્વમેકાં શ◌ૃણુ નિજભક્તમયૂરસૂરિકેકામ્(૨૪) ।
ત્વમસિ તમસિ દિવ્યદૃષ્ટિરન્ધો ભ્રમમિહ દીન ઇતોઽસ્મિ દીનબન્ધો! ॥ ૨૫॥

ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતં શ્રીશઙ્કરસ્તોત્રં સમ્પૂર્ણમ્ ।

શ્રીશઙ્કરાર્પણમસ્તુ ।
અસહિષ્ણુનોગ્ર! । ભવતા હૃદયે દારિદ્ર્યદુઃખમત્યુગ્રં ।
પીતમપિ વિષં તસ્માદ્ભીતમતઃ કણ્ઠ એવાસ્તે ॥ ૧॥

ટિપ્પણિ
૧। પર્વરાત્રિરમણઃ પૂર્ણિમાચન્દ્રસ્તસ્યામૃતભાસાં સર્વ ગર્વ હરતીતિ તત્સમ્બુદ્ધૌ । તેભ્યોઽપ્યતિધવલસ્તાપશાન્તિકરશ્ચ ।
૨। હે શઙ્કર તવ સદીડ્યં કરાબ્જં કે આનતં અનઘં નિષ્પાપં કર્તુમલં ન ઇત્યન્વયઃ । સર્વાનપિ નતાનનઘાન્ વિદધ્યાદિતિ ભાવઃ ।
૩। હે આખિલેશ સર્વેશ । યથા તે પાદપાંસુઃ સુખાસ્યૈ ભવતિ તથા દિવિષદાં પાદપા અપિ ન ઇત્યન્વયઃ ।
૪। ભજતાં ભક્તાનામિષ્ટે ।
૫। સ્વર્ગવાસિનામરાણાં શતં તસ્ય ક્ષયકર્મણિ વિનાશેઽનર્ગલમન્યાહતં પ્રથિતા નિસ્તુલા શક્તિર્યસ્ય તાદૃશઃ તત્સમ્બુદ્ધૌ ।
૬। ષણ્ણાં દ્વિષતાં વર્ગઃ કામાદિષટ્કમ્ ।

૭। મન્તવોઽપરાધાસ્તેષાં કોટયઃ ।

૮। તુષારરુગ્ ધવલઃ ત્વં હિમગિરિશ્ચ ।

૯। અલ્પે વા મહતિ વા યાદસિ જલજન્તૌ વા મુદિહ વર્તતે સા ખલુ તોયાદેવ। એવં તવૈવ સેવયા જગતિ સુખમિતિ યોજ્યમ્ ।

૧૦। વિન્દુના પ્રાજ્ઞેન ।

૧૧। દુષ્ટા ઈશ્વરા રાજાદયઃ ।

૧૨। સનાગમ્ ।

૧૩। અપટં દિગમ્બરમ્ ।

૧૪। ઉત્કમુત્કણ્ઠિતં હૃદયં યસ્યાસ્તાદૃશી ધીઃ ।

૧૫। યેન વસ્તુના મમ મુત્ તત્ ત્વયા કણ્ઠે વિધૃતમિત્યન્વયઃ ।

૧૬। ભવસ્ય સંસારસ્ય તાપં દુઃખં ભજતીતિ તાદૃક્ । અશુદ્ધ ચ મમ મનો ભવતા વાસાય નાઙ્ગીકૃતં કિમિત્યન્વયઃ ।

૧૭। ન આગઃ ઇતિ પદચ્છેદઃ ।

૧૮। કા આર્યાધવ ઇતિ પદચ્છેદઃ । આર્યા પાર્વતી । તવ કા કથા ક્ષમિભિર્નુતા નેત્યન્વયઃ ।

૧૯। શ્રુતિશતસ્ય યઃ સ્તવસ્તસ્યા મુખ્યમાસ્પદમ્ ।

૨૦। હે ઉમેશ ! યેન જનેન તે શ્રુતિશતસ્તવૈકાસ્પદં પદમનાદૃતં તદિતરદ્ ગુરુ ચ સ્વહિતં દ્રુતં સેવિતં તસ્ય તત્સ્વહિતં કાલેન મૃત્યુના વ્યાકુલં સત્ ઉગ્રવિપદાં પદં ન ભવત્ કિમ્ । કમ્પદં પદં સ્થાનં ન ભવેત્ કિં ઇત્યન્વયઃ ।

૨૧। હે પ્રભો! કીર્તિતઃ કીર્ત્યા । કીર્તિવર્ણનેન કીર્તિતઃ સ્તુતો ભવાનિહ કં ન પુનાતિ કં ચ યાચિતં મુદામતિશયેનાચિતં વ્યાપ્તં ચ ફલં ન દદાતિ । સર્વાનપિ દદાત્યેવેત્યર્થઃ । તત્ફલં તવાન્તિકે આસ્તે ઉત ન ઇત્યનયા કુધિયા તયા મેનયેવ ત્વં ધ્રુવમપમાનિતોઽસીત્યન્વયઃ ।

૨૨। ચિરં રુચિરં સ્વપદં મે શિરસિ કુર્વિત્યન્વયઃ ।

૨૩। સતિ આઃ ઇતિ પદચ્છેદઃ । તિગ્માંશૌ સતિ તમઃક્ષતિઃ કથં ન ભવતીત્યન્વયઃ । આઃ ઇતિ ખેદે ।

૨૪। “મયૂરમુગ્ધકેકાં” ઇતિ પાઠઃ । મુગ્ધા રુચિરસ્વના ।

Proofread by Rajesh Thyagarajan

*Shankara Stotram*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*